International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(4): 29-32
© 2019 IJSR
www.anantaajournal.com
Received: 25-05-2019
Accepted: 27-06-2019

**साधु अक्षरमुनिदासः**
शोधच्छात्रः, करनाटक-संस्कृत-विश्वविद्यालयः, बेंगळूरु, कर्नाटक, भारत

Correspondence
**साधु अक्षरमुनिदासः**
शोधच्छात्रः, करनाटक-संस्कृत-विश्वविद्यालयः, बेंगळूरु, कर्नाटक, भारत

# गोपालानन्दभाष्ये व्याख्याने उदाहृतानां श्रुतिस्मृत्यादीनां विमर्शः

**साधु अक्षरमुनिदासः**

**लेखनसार**

भगवद्गीतायाः सन्ति नानाविद्वद्भिरचितानि वैदुष्यपूर्णानि नानाभाष्याणि । तत्र श्रीगोपालानन्दमुनिविरचितस्य श्रीमद्भगवद्गीताभाष्यस्य गभीरता सुन्दरता वैशिष्ट्यता च तदध्ययनेनावगम्यते । अस्मिन् प्रबन्धे गोपालानन्दभाष्ये प्रासंगितया प्रमेयाणि यथा प्रमाणपुरस्सरं प्रतिपादितानि कथं च पूर्वापरश्लोकानां सांगत्यं प्रमाणवचनैरवसीयते प्रमाणवचनानामाशयः क इत्यादि विचारः किंचित्प्रस्तूयते ।

**कुञ्चिकापदानि:** ब्रह्म, जीवः, मोक्षः, भक्तिः इत्यादयः

**प्रस्तावना**

श्रीमद्भगवद्गीतायां द्वितीयाध्याये 2-53 श्लोके अर्जुनं प्रति श्रीकृष्णवचनं एवमस्ति –

तदा गन्तासि निर्वेदमिति [1]।

अस्य व्याख्याने - निर्वेदप्राप्त्या यथावस्थितात्मज्ञानं भविष्यति । धर्मात् ज्ञानं प्रभवति ज्ञानाद्वैराग्यसम्भवः ।वैराग्यात् परमं ज्ञानं परमार्थप्रकाशनम् इति स्मृतेः इति स्मृतिरुदाहृता गोपालानन्दभाष्ये।किमस्य प्रयोजनं यत्स्मृत्युदाहरणमत्र क्रियते इति विमर्श्यमाणे इदं स्पष्टीभविष्यति। अत्र साक्षात् निर्वेदात् ज्ञानप्राप्तिरेव भवति इति मूलात् ज्ञायते ।परंतु स्मृत्या एवं स्पष्टीभवति निर्वेदप्राप्त्यर्थं किं कार्यमिति । यदि धर्मा अनुष्ठीयन्ते तदा सामान्यज्ञानं भवति विषयपदार्थेषु असारत्वप्रकाशकम् । तेन च यदि विषया एव असारा भवन्ति किं तर्हि सारमिति जिज्ञासायां सारभूतपरमार्थप्रकाशकज्ञानमेव सारमिति मतिर्जायते विमर्शेन । तथाच धर्माचरणेन असारत्वज्ञानं तेन जातवैराग्येन भगवत्प्रकाशक-तद्विषयकपरमं ज्ञानं जायते । त्वं च इदानीं क्षात्रधर्मीयः सन् तद्धर्ममाचर। तेन तव धर्म आचरितो भवति । तेन च तव वैराग्यं जायते ।

तेन मद्विषयकपरमार्थप्रकाशकबुद्धिर्जायते इति श्रीकृष्णस्य भाव इति ।।

श्रीकृष्णः वैराग्यस्वरूपबोधनसमये कस्य आत्मदर्शनं भवति इति प्रश्नस्योत्तरतया –एवं बोधयति अर्जुनं प्रति ।

तानि सर्वाणि संयम्य युक्त आसीत मत्परः।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता।। [2] इति ।

अस्य विवरणतया –भाष्ये एवं प्रतिपादितमस्ति । अयं भावः एवं भगवदुपासनदार्ढ्येनादौ विषयरागनिवृत्तिः । तया च स्थितप्रज्ञता भवति । तदनन्तरं चात्मदर्शनं भवतीति । उक्तं च प्रथमस्कन्धे –

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति ।
सत्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम् [3]।। इति

तथाचेदमुक्तं भवति । श्रीकृष्णपादारविन्दे यः सदा विस्मरणं नाप्नोति तस्य अभद्राणि शीघ्रं नश्यन्ति। भगवदविस्मृतिः सत्वशुद्धिं विज्ञानवैराग्ययुक्तभक्तिं तद्ज्ञानं च करोति । तेन च आत्मदर्शनं भवतीति भागवतश्लोकस्य अभिप्राय उक्तो भवति ।

तथैवोत्ररत्र तत्रैव आत्मवश्यैर्विधेयात्मा इत्यस्य व्याख्याने – च स्वधर्मानुकूलस्वजीनवनार्हान् शब्दादीन् कामान् चरन्नपि मदीयजन्माकर्मस्मरणेन अन्तःकरणस्य प्रसन्नतां स्वच्छतां आत्मस्वरूपसाक्षात्कारार्हतामर्हति इति तात्पर्यं हृदि निधाय- स्वजीवनमात्रकामोपभोग एव युक्त इति प्रथमस्कन्धे उक्तम्- कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता । जीवस्य तत्व जिज्ञासा इति भागवतीयवचनमुल्लिखितम् ।। अत्रापि इन्द्रियप्रीतिनिषेधमुखेन वैराग्यं प्रतिपाद्य तत्वजिज्ञासा, तेन चात्मदर्शनविचारः प्रस्तुत इति गम्यते ।

जन्ममरणहेतुः किं भवति इति जिज्ञासा तावत् सर्वस्यापि भवत्येव। तदेव तृतीयाध्याये -9 श्लोकावतारिकाटीकायां –भाष्येपि कृतमस्ति । ननु – यावत् क्रियास्तावदिदं मनो वै कर्मात्मकं येन शरीरबन्धः इति ऋषभदेववचनात्, कर्मणा बध्यते जन्तुः इति स्मृतेश्च शास्त्रीयकर्मणोपि जन्ममरणहेतुत्वात् बन्धनमस्तीति चेत् इति । अत्र शंकामुल्लिखन् भाष्यकारः भागवतवचनमुदाजहार। तेन एदं ज्ञायते । न केवलं महाभारते गीतायां कर्मणः बन्धकत्वविचारः प्रस्तुतः अपितु पुराणादिष्वपि कर्मविचारः नानाविधतया प्रस्तुतः । तत्रोक्तदिशा अपि अस्माभिः कर्मबन्धनक्रम अनुसरणीयो भवति इति ।।

तृतीयाध्याये अयं विषयः प्रसुतः । सर्वैः कर्म क्रियते एव । परं तु यदुद्दिश्य इदं क्रियते इति न स्पष्टमिति । अतः यज्ञादिकर्म यत्क्रियते तद् भगवदुद्देशेन इति स्पष्टयति ।तथाच अयं भाष्यकारः यज्ञार्थात् इत्यस्य व्याख्याने यज्ञशब्दार्थो विष्णुरिति समर्थनाय - यद्वा यज्ञो विष्णुः । तथाच श्रुतिः यज्ञो वै विष्णुरिति इति श्रुतिमुल्लिलेख । तेन अस्माभिः क्रियमाणकर्म भगवदुद्देशेन क्रियते । तेन अस्माकं फलप्राप्तिरिति स्पष्टीभवति ।

किंच उत्तरत्र यज्ञशिष्टाशिनः सन्तो इति 3-13 श्लोकव्याख्यानावसरे यज्ञशिष्टान्नग्रशनेन शरीरधारणं कुर्वतो नरस्य सत्वशुद्धिः, सत्वशुद्धौ सत्यामात्मपरमात्मस्वरूपे अचला स्मृतिः प्रादुर्भवतीति व्याख्याय तत्र प्रमाणतया आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवानुस्मृतिः इति श्रुतिरुदाहृता ।अत्रापि यज्ञशिष्टाशनं नाम भगवदर्पितान्नभोजनमिति सम्प्रदायः ।भगवन्निवेदितान्नस्वीकारेण शरीरशुद्ध्यादिर्भवतीति फलमुक्तं भवति ।।अत्र यज्ञादिकर्मणा च कथं लोकोपकारो भवतीति इति जिज्ञासायां एवं वक्तव्यं भवति । लोके प्रजा वृष्ट्यादिना हि जीवन्तीति प्रसिद्धम् । तच्च अन्नाद्भवन्ति भूतानि 3-14 श्लोकव्याख्यावसरे पर्जन्यात् जीमूतवर्षणात् अन्नोत्पतिः। यज्ञात् पर्जन्यो भवति इत्युक्त्वा तत्र प्रमाणतया –तथाच स्मृतिः अग्निः प्रास्ताहुतिः सम्यक् आदित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इति मनुस्मृतिश्लोदादाहृता । तेनेदं स्पष्टं भवति यत् अस्मत्कृतयज्ञादिकर्म न केवलं आत्मज्ञानादिसाधनं अपि तु अस्मज्जीवनसाधनमपि भवतीति ।।

तदेव स्पष्टयति अर्जुनं प्रति श्रीकृष्णः। तथाहि-श्रीकृष्णः यज्ञादिकर्म कुतः सृष्टं, किं चास्य प्रयोजनं भवति इत्यादि स्पष्टयन् एवमुपदिशति । सह यज्ञाः प्रजाः सृष्ट्वा इति । अस्य श्लोकस्य व्याख्याने- श्रीकृष्णोपदिष्टवचसां संवादितया श्रुतिस्मृतयः उदाहृताः । तद्यथा -तथाच श्रूयते – यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै इति ।स्मृतिश्च तेन ब्रह्म हृदा य आदिकवये मुह्यन्ति यं सूरयः इति प्रथमतः वेद-पुराणयोरुल्लेखः कृतः । अत्र प्रथमवाक्ये भगवान् आदौ ब्रह्माणं असृजत् । तस्य वेदांश्चोपदिदेश इति उक्तम् । भागवतवचनेपि आदिकवये ब्रह्मणे ब्रह्म वेदम् उपदिष्टवान् इति स्पष्टीकृतम् ।।

तत्रैव संवादितया स्कान्दवचनमप्यत्र भाष्ये उदाहृतमस्ति । तद्यथा-

प्रजापतीनां स पतिस्ततः प्राहाखिलाः प्रजाः ।
इज्याः देवाश्च पितरो हव्यकव्यात्मकैर्मखैः ।
इष्टाः सम्पूरयिष्यन्ति ह्येते युष्मन्मनोरथान् ।
एतान् ये नार्चयिश्यन्ति ते वै निरयगामिनः ।
इत्थं कृता हि मर्यादा तेन नारायणात्मना ।
दैवं पित्र्यमतो नित्यं जनैः कार्यं यथाविधि ।।

इति । एवं च यदिहास्ति तदन्यत्र इति वचनेन इदं स्पष्टं भवति यद् गीतायां उच्यते तदेवेतरपुराणेश्वपि उक्तानि इति ।।

एवमेव देवान् भावयता अनेन इति श्लोकव्याख्यानावसरे- भगवदाराधनेन मोक्षो भवति इति प्रतिपादननिरूपणावसरे भाष्ये एवं प्रतिपादितम् । तथाहि रुद्रेन्द्राग्न्यादयो नारदसनकादयश्च वासुदेवादिचतुर्व्यूहाराधनेनेष्टसुखं मोक्षं च प्राप्स्यन्तीत्यर्थः । तत्र प्रमाणं- त्वमकरणः स्वराडखिलकारकशक्तिधरस्तव बलिमुद्वहन्ति समदन्त्यजयानिमिषाः । वर्षभुजोखिलक्षितिपतेरिव विश्वसृजो विदधाति यत्र ये त्वधिकृता भवतश्चकिताः इति । अनेन इदं ज्ञायते। गीतायां यदुच्यते तत्सर्वमपि श्रुतिसंवादीनि । यतः भागवते श्रुतिगीतायां यत्प्रतिपादितं तदेवात्रापि उक्तमस्ति । अपौरुषेयश्रुतिमूलकत्वात् गीतायाः महत्प्रामाण्यमप्यनुसन्धेयमस्माभिरिति ।।

किं च यज्ञादिकर्मनिरूपणावसरे अनेकविषयाः प्रासंगिकतया प्रतिपादिताः तथाहि- कर्म ब्रह्मोद्भवं विद्धि इति 3-15 श्लोकव्याख्यानावसरे वेदः अक्षरात् नारायणात् समुद्भवति । अक्षरशब्देन नारायणस्य वाच्यत्वे प्रमाणं - एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ [4] इति श्रुतिः । तस्मात् वेदोद्भवे प्रमाणम्-

अस्य महतो भूतस्य निश्वसितमेतत् यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वा [5] इति श्रुतिः । इति श्रुतिद्वयोल्लेखेन अक्षरशब्दवाच्यत्वं नारायणस्य समर्थ्य वेदा नारायणोद्भवा इति प्रपंचितम् । कीदृशोयं भगवान् इत्यस्योत्ततया ये मे मतमिदं इति 3-31 श्लोकव्याख्याने मे मतम् इत्यस्य व्याख्याने- मे- निरस्तसाम्यातिशयेन राधसा स्वधामनि ब्रह्मणि रंस्यते नमः । न वासुदेवात् परमस्ति दैवतम्, न तत्समश्चाभ्यधिकश्च दृश्यते, अक्षरात् परत-परः, पुरुषान्नपरं किंचित्, अक्षरमन्तरो यममयति, तमीश्वराणां परमं महेश्वरं इत्यादिश्रुतिस्मृतिवचनैः प्रतिपादितस्वरूपस्य मम । इति भगवत्स्वरूपस्य विवरणं कृतम् ।

किंचायं भगवान् नानाविधतया स्वाविर्भावं प्रकटयति इत्यस्य विवरणं नानाप्रकारत्या कृमस्ति । तद्यथा अजोपि सन्नव्ययात्मा (4-6 ) इति श्लोके भगवत आविर्भावविधौ प्रमाणानि उल्लिखितानि । तथाहि- अजायमानो बहुधा विजायते । तस्य धीराः परियन्ति योनिम्(जन्मप्रकारम्) । तमद्भुतं बालकममंबुजेतक्षणं चतुर्भुजंम् । पित्रोः सम्पंश्यतोः सद्यो बभूव प्राकृतः शिशुः । वै किलायं पुरुषः पुरातनः । दुरवगतात्मतत्वनिगमाय तवात्ततनोः । स त्वं साक्षाद्विष्णुः अध्यात्मदीपः । अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसाम् । नन्मवन्यथा कोर्हति देहोगं परो गुणानामपि कर्मतनन्त्रम् इत्यादि श्रुतिस्मृतिपुराणादीनि ।।तत्रैव तस्य जन्महेतौ प्रमाणानि- देवक्याः पुत्रतां लेभे प्राप्स्यामि । अहं सुतो वामभवं पृश्निगर्भ इत्यादि भागवतवचनानि।। इत्येवं नानाश्रुतिस्मृतिपुराणोल्लेखपुरस्सरं भगवत्तत्त्वस्वरूपं

प्रतिपादितमस्ति। एतादृशभगवत्स्वरूपजिज्ञासया किं फलं भवतीति चतुर्थे निरूपितमस्ति। तद्यथा।

**बहवो ज्ञानतपसा पूताः** [6]

इति श्लोकव्याख्याने मत्स्वरूपमाहात्म्यज्ञान-मदुक्तधर्माभ्यां शुद्धाः निरस्तसमस्ताविद्याजनितदोषगन्धाःअक्षरत्वं प्राप्ताः इत्युक्त्वा तत्समर्थनाय तत्र श्रुतिः- तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति इति उक्ता। तथाच वैराग्यादिना आत्मदर्शनं तेन च पुण्यपापादिविमोकः, ततश्च भगवत्प्राप्तिरिति सिद्धः सिद्धान्तः।।

**गोपालानन्दभाष्ये व्याकरणशास्त्रविचारः**

गोपालानन्दभाष्ये यथा श्रुतिस्मृत्याद्युदाहरणं तथा व्याकरणशास्त्रोल्लेखोपि दृश्यते।तानिच कानिचिदुदाहरणाय प्रदर्श्यन्ते । तथा हि – ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनामिति (3-अध्याये 3) गीताश्लोकव्याख्यानावसरे साङ्ख्यशब्दनिरुक्तिः कृता – तथाहि सम्यक् ख्यायते प्रकाशते आत्मतत्वमनेनेति सङ्ख्यम् । सङ्ख्यमेव साङ्ख्यम् -ज्ञानमस्ति येषाम्। घञर्थे कविधानात् इति कः । प्रज्ञादिभ्यश्च इति आकृतगणत्वात् अण् प्रत्ययः । अर्श आदिभ्यो अच् इति मत्वर्थीयाच्प्रत्ययः । इति साङ्ख्यशब्दनिरुक्तिः सम्यक् उपपादिता ।। एवमेव अनेन प्रसविष्यध्वम् इति तृतीयाध्यायश्लोकव्याख्यानावसरे प्रसविष्यध्वम् इत्यस्य प्रसूयध्वमिति व्याख्याय लोट् प्रयोगेपि व्यत्ययो बहुलमिति अनेन लृट् प्रयोगः इति स्वव्याख्यानसाधुत्वप्रदर्शनं कुतम्।

किंच मयि सर्वाणि कर्माणि सन्न्यस्याध्यात्मचेतसा इति तृतीयाध्यायगत30श्लोकव्याख्यावसरे-अध्यात्मशब्दनिरुक्तिरेवं कृता । आत्मनि मयि परमात्मनि इति अध्यात्म् । अव्ययं विभक्ति इत्यनेन विभक्त्यर्थे अव्ययीभावः । अनश्च इति टच् । नस्तद्धिते इत्यनेन टिलोपः।। तथैव - चातुर्वर्ण्यं मया सृष्टम् [7]

इत्यत्र चत्वारो वर्णाः चातुर्वर्ण्यम् । चातुर्वर्ण्.दीनाम् इत्यनेन स्वार्थे ष्यञ्।तद्धितार्थे इति तत्पुरुषः । इत्येवं चातुर्वर्ण्यशब्दनिष्पत्तिः सम्पादिता ।।

**उपसंहारः**

इत्येवं गोपालान्दविरचितभाष्योक्त-श्रुति-स्मृति-व्याकरणप्रसंगः अस्मिन् प्रबन्धे यथाग्रन्थं निरूपितः । अपि चानेके विषयाः गोपालानन्दभाष्ये अतीव सुष्ठु विमृष्टाः । ग्रन्थबाहुल्यभयाद्विरम्यते।

**संधर्व सूची**

1. २-५८
2. 2-61
3. श्रीमद्भा० १२/१२/५४
4. बृहदारण्यकोपनिषत् ५-८-८
5. बृहदारण्यकोपनिषत् ५-८-८
6. (4-10)
7. भगवद्गीता 4-13